# Shri Nilakantha Aghorastrastotram

# श्री नीलकण्ठ अघोरास्त्रस्तोत्रम्

## Document Information

Text title : Nilakantha Aghorastra Stotram

File name : nIlakaNThaaghorAstrastotram.itx

Category : shiva, astra

Location : doc_shiva

Latest update : September 25, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

September 25, 2026

*sanskritdocuments.org*

# श्री नीलकण्ठ अघोरास्त्रस्तोत्रम्

विनियोगः ।
ॐ अस्य श्रीभगवान् नीलकण्ठसदाशिवस्तोत्रमन्त्रस्य श्रीब्रह्माऋषिः अनुष्टुपछन्दः श्रीनीलकण्ठसदाशिवो देवता । ब्रह्मबीजम् । पार्वतीशक्तिः । मम समस्त पापक्षयार्थं क्षेमस्थैर्यायुरोग्याभिवृद्ध्यर्थं मोक्षादिचतुर्वर्गसाधनार्थं च श्रीनीलकण्ठसदाशिवप्रसादसिद्ध्यर्थे जपे विनियोगः ॥

ऋष्यादिन्यास ।
श्रीब्रह्माऋषये नमः शिरसि ।
अनुष्टुप्छन्दसे नमः मुखे ।
श्रीनीलकण्ठसदाशिवदेवतायै नमः हृदि ।
ब्रह्मबीजाय नमः लिङ्गे ।
पार्वतीशक्त्यै नमः नाभौ ।
मम समस्तपापक्षयार्थं क्षेमस्थैर्यायुरारोग्याभिवृद्ध्यर्थं मोक्षादिचतुर्वर्गसाधनार्थं च श्रीनीलकण्ठसदाशिवप्रसादसिद्ध्यर्थे जपे विनियोगाय नमः सर्वाङ्गे ॥

मूल स्तोत्रम् ।
ॐ नमो नीलकण्ठाय श्वेतशरीराय सर्पालङ्कारभूषिताय भुजङ्गपरिकराय नागयज्ञोपवीताय अनेकमृत्युविनाशाय नमः ।
युगयुगान्तकालप्रलयप्रचण्डाय प्रज्वालमुखाय नमः । दंष्ट्राकरालघोररूपाय हुं हुं फट् स्वाहा ।
ज्वालमुखाय मन्त्रकरालाय प्रचण्डार्कसहस्रांशुचण्डाय नमः । कर्पूरमोदपरिमलाङ्गाय नमः ।
ॐ ईं ईं नील-महानील-वज्र-वैलक्ष्य-मणिमाणिक्य-मुकुटभूषणाय हन हन हन दहन दहनाय ।
॥ श्रीअघोरास्त्र मूल मन्त्रः ॥

ॐ ह्रां ॐ ह्रीं ॐ ह्रूं स्फुर अघोररूपाय रथ रथ तन्त्र तन्त्र चट चट कह कह मद मद

दहन दाहनाय श्रीअघोरास्त्रमूलमन्त्र जरामरण-भय हूं हूं फट् स्वाहा ।
अनन्ताघोर ज्वर-मरण-भय-क्षय-कुष्ठ-व्याधि-विनाशाय शाकिनी-डाकिनी-ब्रह्मराक्षस-दैत्य-दानव-बन्धनाय अपस्मार-भूत-वैताल-डाकिनी-शाकिनी-सर्वग्रह-विनाशाय मन्त्रकोटि-प्रकटाय परविद्योच्छेदनाय हूं हूं फट् स्वाहा ।
आत्ममन्त्रसरक्षणाय नमः ।
ॐ ह्रां ह्रीं ह्रौं नमो भूत डामरी ज्वाल वशभूतानां द्वादशभूतानां त्रयोदश-षोडश-प्रेतानां पञ्चदश-डाकिनी-शाकिनीनां हन हन । दहन दारनाथ । एकाहिक-द्याहिक-त्र्याहिक-चातुर्थिक-पञ्चाहिक- व्याघ्रपादान्त वातादि- वात-सरिक-कफ-पित्तक-काश-श्वास- श्लेष्मादिकं दह दह छिन्धि छिन्धि श्रीमहादेवनिर्मितं स्तम्भन-मोहन-वश्याकर्षणोच्चाटन कीलनोद्वेषण इति
षट्कर्माणि वृत्य हूं हूं फट् स्वाहा ।
वातज्वरमरणभय छिन्न छिन्न नेह नेह भूतज्वर-प्रेतज्वर-पिशाचज्वर-रात्रिज्वर- शीतज्वर-तापज्वर-बालज्वर-कुमारज्वर- अमितज्वर-दहनज्वर-ब्रह्मज्वर-विष्णुज्वर-रुद्रज्वर- मारीज्वर-प्रवेशज्वर-कामादिविषमज्वर-मारीज्वर-प्रचण्डघराय-प्रमथेश्वर शीघ्रं हूं हूं फट् स्वाहा ।
ॐ नमो नीलकण्ठाय दक्षज्वरध्वंसनाय श्रीनीलकण्ठाय नमः ।
फलश्रुतिः ।
सप्तवारं पठेत्स्तोत्रं मनसा चिन्तितं जपेत् ।
तत्सर्वं सफलं प्राप्तं शिवलोकं स गच्छति ॥

॥ इति श्रीनीलकण्ठ अघोरास्त्र सम्पूर्णम् ॥

*Shri Nilakantha Aghorastrastotram*

pdf was typeset on September 25, 2026

Please send corrections to *sanskrit@cheerful.com*